# संस्कृतवार्ता:

दिनाङ्क :- 24.05.2025 सायम् :- 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी नीत्यायोगस्य उपवेशने प्रत्येकं राज्यम् आग्रहं अकरोत् यत् वैश्विकमानकानामनुरूपं न्यूनातिन्यूनम् एकं पर्यटनस्थलं विकसिताय, सर्वाणि आवश्यकानि सौविध्यानि, आधारभूतसंरचनाः च प्रदद्यात्।
- भारतेन संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि आतंकवादस्य विषये कट्वालोचितं पाकिस्तानम् ।
- विदेशमन्त्री सुब्रमण्यम् जयशङ्करः आतंकवादं विरुद्ध्य भारतं प्रति जर्मनी-देशस्य समर्थनमभिलक्ष्य प्रकटितवान् कार्तज्ञभावम् ।
- केरल-राज्ये प्रावृट् काल:, निर्धारितदिनांकात् अष्टदिनानि पूर्वमेव आगतः ।
- भारते क्रिकेटनियन्त्रणमण्डलेन आथित्यस्य इङ्ग्लैण्ड्-विरुद्धस्य आगामि-पञ्च-क्रीडा-श्रृङ्खलायाः कृते षोडश सदस्यीय-भारतीय-निकष-क्रिकेट्-दलस्य घोषणा कृता, भारतीय दलस्य नूतनः नायकः भविष्यति शुभमन गिल:।

--------------------------------

पीएम नीति आयोग

प्रधानमन्त्री नरेन्द्रमोदी प्रत्येकं राज्यम् आग्रहं अकरोत् यत् वैश्विकमानकानामनुरूपं न्यूनातिन्यूनम् एकं पर्यटनस्थलं विकसिताय, सर्वाणि आवश्यकानि सौविध्यानि, आधारभूतसंरचनाः च प्रदद्यात्। नवदिल्ल्यां नीत्यायोगस्य दशमस्य शासकपरिषदः उपवेशनस्य अध्यक्षतां कुर्वन् प्रधानमन्त्री नरेन्द्रमोदी पर्यटनं वर्धयितुं समीपस्थनगरानां विकासाय च "एकं राज्यं, एकं वैश्विकं गन्तव्यं" इति उपक्रमे बलं दत्तवान्। द्रुतगत्या नगरीकरणं प्रकाशयन् सः विकासेन, नवाचारेण, स्थायित्वेन च प्रेरित-भविष्याय सज्जितानां नगरानां आह्वानं कृतवान् ।

प्रधानमन्त्रिणा मोदिना केन्द्र-राज्याभ्यां सहयोगेन द्रुततर-विकासस्योपरि बलं दत्तं यत् यदा प्रत्येकस्य राज्यस्य विकासः भवति तदैव भारतमपि विकसितं भविष्यति। सः सम्मानपूर्णैः विधिनां नीतिनां च महिलानां कार्यबले अधिकाधिकं समावेशस्यापि आग्रहं कृतवान्। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः, आन्ध्रप्रदेशस्य मुख्यमन्त्री चन्द्रबाबू नायडु, हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंह सुख्खु मध्यप्रदेशस्य मुख्यमन्त्री मोहन यादवः, छत्तीसगढस्य मुख्यमन्त्री विष्णुदेव साई इत्यादयः सभायां भागं गृह्णन्ति। केन्द्रशसितप्रदेशाणाम् उपराज्यपालाः, केन्द्रीयमन्त्रिणः, नित्यायोगस्य उपाध्यक्षः, सदस्याः, मुख्यकार्यकारी चापि अस्मिन् सत्रे उपस्थिताः आसन्। अस्मिन् वर्षे शासकपरिषदः उपवेशनस्य विषयः अस्ति सप्तचत्वारिंशदधिक द्विसहस्रतमवर्ष पर्यन्तं विकसितभारताय विकसितराज्यम् इति। कार्यसूचनायाः प्रमुखविषयेषु उद्यमशीलतायाः प्रवर्धनं, कौशलसम्वर्धनं, स्थायि वृत्यावसराणां जननं च अन्तर्भवति । एषः उपक्रमः राज्येभ्यः आग्रहं करोति यत् ते राष्ट्रियलक्ष्यैः समयबद्धलक्ष्यैः च सह सङ्गतं साहसिकं, समावेशी, दीर्घकालिकदृष्ट्याः प्रतिवेदनानां रूपरेखायाः निर्माणं कुर्वन्तु।

---------------------------------

भारत संयुक्त राष्ट्र संघ

भारतेन संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि आतंकवादस्य विषये पाकिस्तानं कट्वालोचितम्। यत: भारतं बहुभ्यः वर्षेभ्यः पाकिस्तान-प्रायोजितातंकवादं आक्रमणं च सम्मुखीकरोति इति। संयुक्तराष्ट्रे भारतस्य स्थायीप्रतिनिधिः पर्वतनेनी हरीश: सशस्त्रसंघर्षेषु नागरिकानाम् सुरक्षाविषये एकस्मिन् मुक्त-वादविवादे एतत् अवोचत्। सः अवदत् यत् पाकिस्तानदेशः भयोत्पादनं आतंकवादं मुहर्मुहः प्रवर्धयति । श्री हरीशः अवदत् यत् सद्यः एव सिन्दूराभियाने मृतानां कुख्यातानां भयोत्पादकाणां आततायिनां अन्त्येष्टिसंस्कारे पाकिस्तानस्य वरिष्ठा: सर्वकारीयकार्यकर्तारः, आरक्षकाः, सैन्यबलस्य अधिकारिणः च भागं गृहीतवन्तः ।

---------------------------------

जयशङ्करः- बर्लिन्

विदेशमन्त्री सुब्रमण्यम् जयशङ्करः आतंकवादं विरुद्ध्य भारतं प्रति जर्मनी-देशस्य समर्थनमभिलक्ष्य कृतज्ञतां प्रकटितवान्। जर्मनी-देशस्य बर्लिन्-नगरे जर्मन्-कौन्सिल्-आन्-फ़ॉरेन-रिलेशन्स् इत्यत्र वार्तालापं कुर्वन् डा. जयशङ्करः अवदत् यत् जर्मनी-देशस्य भयोत्पादक-आक्रमणस्य निन्दया भारतं उल्लसितम् अस्ति इति। डा. जयशङ्करः अवदत् यत् पाकिस्तान-देशः आतंकवादं शस्त्ररूपेण बहुभ्यः वर्षेभ्यः प्रयुक्तवान्, भयोत्पादकेभ्यः आश्रयं च दत्तवान् इति। डा. जयशङ्करः पहलगाम्-भयोत्पादक-आक्रमणस्य निन्दाम् अकरोत्, यत् न केवलं जम्मू-कश्मीर्-प्रदेशयोः अपितु भारतस्य अन्येषु भागेषु अपि लक्ष्यं अकरोत् । विदेशमन्त्रिणा भारत-जर्मनी-सम्बन्धस्य विषये उक्तं यत् उभयदेशयोः मध्ये रक्षा सुरक्षा क्षेत्रयो: परस्पर-सम्बन्धाः अतीव सुदृढौ भविष्यत: इति।

--------------------------------

केरल-वृष्टि:

दक्षिण-पश्चिम-वृष्टिकालः अद्य केरल-राज्ये षोडश-वर्षेषु प्रथमवारं, निर्धारितदिनांकात् अष्टदिनानि पूर्वमेव आगतः । केरल-राज्ये सामान्यतः जून्-मासस्य एक दिनाङ्के प्रावृट् कालः आयाति । भारतीय-ऋतु-विज्ञान-विभागेन संसूचितं यत् इत: पूर्वं केरल-राज्ये नवाधिकद्विसहस्रतमे वर्षे प्राक् प्रावृट् काल: आगत:। एतदतिरिच्य ऋतु-विभाग: सूचयति यत् कर्णाटकस्य कार्वार्, शिवमोग्गा, हसन्, मैसूरु क्षेत्रेषु प्रावृटं आयाति। सममेव महाराष्ट्रस्य च कतिपयजनपदेषु वृष्टिः दृश्यते। भारतीय-ऋतु-विज्ञान-विभागेन सप्तजनपदेषु नारंगवर्णीया संचेतना अपि च द्वयोः राज्ययोः कृते रक्तवर्णीया संचेतना प्रकटिता।

--------------------------------

मलेशिया मास्टर्स् बैडमिण्टन्

बैडमिण्टन्-क्रीडायां शीर्ष भारतीय क्रीडकः किदम्बी श्रीकान्तः अद्य जापानस्य युशी तनाका इत्यस्मै पराजित्य मलेशिया-मास्टर्स्-क्रीडायाः पुरुष-एकल-अन्तिम-क्रीडायां

प्रविष्टवान्। एकविंशत्यधिक द्विसहस्रतमे वर्षे विश्वचैम्पियनशिप्स क्रीडायां रजतपदकविजेता द्वात्रिंशत् वयोवर्षीयः क्रीडकः उपान्त्यचक्रीय-क्रीडायां एकविंशतिः-अष्टादशः, चतुर्विंशति-द्वाविंशति: इत्यंकांतरालेन विजयं प्राप्तवान् ।

---------------------------------

निकष-दलम्

भारते क्रिकेटनियन्त्रणमण्डलेन आथित्यस्य इङ्ग्लैण्ड्-विरुद्धस्य आगामि-पञ्च-क्रीडा-श्रृङ्खलायाः कृते षोडश सदस्यीय-भारतीय-निकष-क्रिकेट्-दलस्य घोषणा कृता, यत् जून-मासस्य विंशतिः दिनाङ्कात् आरभ्यते। भारतीय दलस्य नूतनः निकष दल नायकः शुभमन गिल्, दलस्य उपनायकत्वेन ऋषभपन्तः चयनितौ। भारतस्य कृते नवयुगस्य आरम्भः भविष्यति, यत्र विराट् कोहली-रोहितशर्मयोः निकष-निवृत्तिः अभवत् ।

---------------------------------

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: श्व: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

।। इति वार्ता: ।।